रघुवंशस्य प्रथमसर्गस्थानां बहुव्रीहिसमासानामध्ययनम्

डॉ. तुहिन-मण्डलः *
डॉ. राकेश-दाशः †

Abstract

[कविकुलगुरोः कालिदासस्य निरवद्या साहित्यकृतिः रघुवंशम् इति महाकाव्यम्। महाकाव्येऽस्मिन् महाकविना रघुवंशीयनृपाणां वंशवर्णनं विहितम्। तत्र ऊनत्रिंशत्-राज्ञां चरितवर्णनं लभ्यते। ऊनविंशतिसर्गात्मके अस्मिन् महाकाव्ये रघूणां वंशवर्णनावसरे कालिदासेन बहुत्र समासवृत्तेः आश्रयः कृतः। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। एताः पञ्च वृत्तयः अपि रघुवंशे परिलक्ष्यन्ते। परन्तु सर्वापेक्षया आधिक्यम् अस्ति समासवृत्तेः। तत्रापि पञ्चविधेषु समासेषु तत्पुरुषसमासस्यैव आधिक्यम्। केवलसमासः, अव्ययीभावः, द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः इति समासानां पञ्च भेदाः। अस्मिन् प्रबन्धे वयं बहुव्रीहिसमासविषये आलोचयामः। तथाहि अस्मिन् काव्ये प्रथमसर्गे बहुव्रीहिसमासस्य संख्या कियती विद्यते, कुत्र कुत्र बहुव्रीहिसमासस्य प्रयोगः अस्ति, प्रयोगः पाणिनीयः अस्ति न वा, यस्मिन् पदे बहुव्रीहिसमासः विद्यते तस्य विग्रहवाक्यं किं भवति, व्याख्यानादिषु क्वचित् विग्रहवाक्यं दोषयुक्तं लभ्यते वा इत्यादिविषयाः अस्मिन् प्रबन्धे आलोच्यन्ते।]

कुञ्चिकाशब्दाः— रघुवंशम्, कालिदासः, बहुव्रीहिः, समासः, विग्रहवाक्यम्।

उपोद्घातः

पञ्चविधेषु समासेषु बहुव्रीहिः अन्यतमा। बहुव्रीहिसमासविधायकं मुख्यं सूत्रं तावत् "अनेकमन्यपदार्थे"[१] [अष्टाध्यायी २.२.२४] इति। प्रायेण अन्यपदार्थप्रधानः अयं समासः। "सप्तमीविशेषणे बहुव्रीहौ" [अष्टाध्यायी २.२.३५] इति सूत्रेण सप्तम्यन्तस्य विशेषणवाचकपदस्य च पूर्वनिपातः भवति बहुव्रीहौ इति सामान्यनियमः। कुत्रचित् समासान्तत्वेन सामान्यतः

---

* प्रकाशनसहायकः, प्रकाशनप्रविभागे, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु; Email : tuhinmandal55@gmail.com

† सहाचार्यः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु; Email : rakdas@gmail.com

१ अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः।

कप्प्रत्ययस्य विधानं परिलक्ष्यते बहुव्रीहिसमासे । अत्र रघुवंशमहाकाव्ये प्रथमसर्गे यानि बहुव्रीहिनिष्पन्नपदानि सन्ति तेषां पर्यालोचनं विधीयते । अत्र प्रतिपदं पार्श्वे कोष्ठकयोः सर्गसंख्या श्लोकसंख्या च उल्लिख्यते ।

1. **सूर्यप्रभवः (१.२)**— सूर्यः प्रभवः यस्य इति विग्रहे "अनेकमन्यपदार्थे" [अष्टाध्यायी २.२.२४] इति सूत्रेण बहुव्रीहिसमासे सूर्यप्रभवः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । ग्रन्थे वंशः इति पदस्य विशेषणमिदम् । तादृशः वंशः यस्य प्रभवः सूर्यः इत्यर्थः । सूर्यप्रभवः इत्यनेन वंश इति अन्यपदार्थस्य निर्देशात् अत्र बहुव्रीहिः स्वीक्रियते ।
2. **अल्पविषया (१.२)**— अल्पः विषयः यस्याः इति विग्रहे बहुव्रीहिसमासे अल्पविषया इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । मतिः इति पदस्य विशेषणमिदम् । कालिदासः स्वस्य मतेः विषये कथयति तस्य मतिः अल्पविषययुक्ता । एवञ्च अल्पविषया इत्यनेन अन्यपदार्थस्य मतिः इत्यस्य परामर्शात् अत्र बहुव्रीहिसमासः ।
3. **उद्बाहुः (१.३)**— उत्तोलितः बाहुः येन इति लौकिकविग्रहे उत्तोलित सु बाहु सु इत्यलौकिकविग्रहे "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः" इति वार्तिकेन बहुव्रीहिसमासे तोलितः इति उत्तरपदस्य लोपे उद्बाहुः इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । यद्यपि उत्तोलितः बाहुः यस्य इति विग्रहे षष्ठ्यर्थबहुव्रीहिः अत्र दर्शयितुं शक्यते । परन्तु प्रसङ्गानुसारम् अन्यपदार्थत्वेन कर्तुः परामर्शत्वात् तृतीयार्थबहुव्रीहिः युक्ततरः अस्ति ।
4. **कृतवाग्द्वारे (१.४)**— कृतः वाग्द्वारः यस्मिन् इति विग्रहे बहुव्रीहिसमासे कृतवाग्द्वारः इति रूपम् । ततः सप्तम्येकवचने कृतवाग्द्वारे इति रूपं निष्पद्यते । ग्रन्थे वंशे इति पदस्य विशेषणमिदम् । यस्मिन् वंशे वाग्रूपः द्वारः पूर्वसूरिभिः कृतः अस्ति तस्मिन् वंशे मम (कालिदासस्य) गतिः भवति । अर्थात् तादृशवंशस्य वर्णनां करोमि इति तात्पर्यम् । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते ।
5. **आफलोदयकर्मणाम् (१.५)**— आफलोदयं कर्म येषाम् इति विग्रहे बहुव्रीहिसमासे आफलोदयकर्माणः इति रूपं निष्पद्यते । ततः षष्ठीबहुवचने आफलोदयकर्मणाम् इति रूपम् । "रघूणाम् अन्वयं वक्ष्ये" इति मूलग्रन्थस्य रघूणाम् इति पदस्य विशेषणमिदम् । अत्र

षष्ठ्यर्थबहुव्रीहिः विद्यते ।

6. **आनाकरथवर्त्मनाम् (१.५)**— आनाकं रथवर्त्म येषाम् इति विग्रहे बहुव्रीहिसमासे आनाकरथवर्त्मानः इति रूपं निष्पद्यते । ततः षष्ठीबहुवचने आनाकरथवर्त्मनाम् इति रूपम् । रघूणाम् इति पदस्य विशेषणमिदम् । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
7. **यथाविधिहुताग्नीनाम् (१.६)**— यथाविधिहुताः अग्नयः यैः इति विग्रहे बहुव्रीहिसमासे यथाविधिहुताग्नयः इति रूपं निष्पद्यते । ततः षष्ठीबहुवचने यथाविधिहुताग्नीनाम् इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । रघूणाम् इति पदस्य विशेषणमिदम् ।
8. **यथाकामार्चितार्थिनाम् (१.६)**— यथाकामम् अर्चिताः आर्थिनः यैः इति विग्रहे बहुव्रीहिसमासे यथाकामार्चितार्थिनः इति रूपं निष्पद्यते । ततः षष्ठीबहुवचने यथाकामार्चितार्थिनाम् इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । रघूणाम् इति पदस्य विशेषणमिदम् ।
9. **यथापराधदण्डानाम् (१.६)**— यथापराधं दण्डः येषाम् इति विग्रहे बहुव्रीहिसमासे यथापराधदण्डाः इति रूपम् । ततः षष्ठीबहुवचने यथापराधदण्डानाम् इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । रघूणाम् इति पदस्य विशेषणमिदम् ।
10. **सम्भृतार्थानाम् (१.७)**— सम्भृतः अर्थः यैः इति विग्रहे बहुव्रीहिसमासे सम्भृतार्थाः इति रूपम् । ततः षष्ठीबहुवचनविवक्षायां सम्भृतार्थानाम् इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । रघूणाम् इति पदस्य विशेषणमिदम् ।
11. **अभ्यस्तविद्यानाम् (१.८)**— अभ्यस्ताः विद्याः यैः इति विग्रहे बहुव्रीहिसमासे अभ्यस्तविद्याः इति रूपम् । ततः षष्ठीबहुवचनविवक्षायां अभ्यस्तविद्यानाम् इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । रघूणाम् इति पदस्य विशेषणमिदम् ।
12. **मुनिवृत्तीनाम् (१.८)**— मुनीनां वृत्तिः मुनिवृत्तिः । मुनिवृत्तिः इव वृत्तिः येषाम् इति विग्रहे बहुव्रीहिसमासे मुनिवृत्तयः इति रूपम् । ततः षष्ठीबहुवचने मुनिवृत्तीनाम् इति रूपं निष्पद्यते । "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकेन अत्र बहुव्रीहिसमासः, वृत्तिः इति उत्तरपदस्य लोपश्च जातः । अत्र

षष्ठ्यर्थबहुव्रीहिः विद्यते । रघूणाम् इति पदस्य विशेषणमिदम् ।

13. **तनुवाग्विभवः (१.९)**— तनुः वाग्विभवः यस्य इति विग्रहे बहुव्रीहिसमासे तनुवाग्विभवः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । अहम् इति पदस्य विशेषणमिदम् । यद्यपि श्लोके अहम् इति पदम् नास्ति, तथापि श्लोकस्थस्य वक्ष्ये इति क्रियापदस्य उत्तमपुरुषत्वात् तस्य कर्तृत्वात् अहम् इति कर्तृपदम् अध्याहार्यम् । अहं कालिदासः अल्पवाणीसम्पत्तियुक्तः इत्यर्थः ।
14. **व्यूढोरस्कः (१.१३)**— व्यूढम् उरः यस्य इति विग्रहे बहुव्रीहिसमासे व्युढोरस्कः इति रूपं निष्पद्यते । "उरःप्रभृतिभ्यः कप्" [अष्टाध्यायी ५.४.१५१] इति सूत्रेण अत्र समासान्तः कप्प्रत्ययः जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । राज्ञः दिलीपस्य वर्णनावसरे विशेषणमिदं प्रयुक्तम् । मूलग्रन्थे "दिलीप इति राजेन्दुः" [रघुवंशम् १.१२] इति वाक्यं लिखितम् । ततः आरभ्य दिलीपस्य वर्णना प्रारब्धा । व्यूढोरस्कः इति समस्तपदस्य अन्यपदार्थत्वेन दिलीपस्य परामर्शः ।
15. **वृषस्कन्धः (१.१३)**— वृषस्य स्कन्धः इव स्कन्धः यस्य इति विग्रहे बहुव्रीहिसमासे वृषस्कन्धः इति रूपं निष्पद्यते । "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकेन अत्र बहुव्रीहिसमासः, स्कन्ध इति उत्तरपदस्य लोपश्च जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपः इत्यस्य विशेषणमिदम् ।
16. **महाभुजः (१.१३)**— महान्तौ भुजौ यस्य इति विग्रहे बहुव्रीहिसमासे महाभुजः इति रूपं निष्पद्यते । "आन्महतः समानाधिकरणजातीययोः" [अष्टाध्यायी ६.३.४६] इति सूत्रेण अत्र महच्छब्दस्य आत्त्वम् । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपः इत्यस्य विशेषणमिदम् ।
17. **सर्वातिरिक्तसारेण (१.१४)**— सर्वातिरिक्तः सारः यस्य इति विग्रहे बहुव्रीहिसमासे सर्वातिरिक्तसारः इति रूपम् । ततः तृतीयैकवचने सर्वातिरिक्तसारेण इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । आत्मना इति पदस्य विशेषणमिदम् ।
18. **आकारसदृशप्रज्ञः (१.१५)**— आकारसदृशी प्रज्ञा यस्य इति विग्रहे बहुव्रीहिसमासे आकारसदृशप्रज्ञः इति रूपं निष्पद्यते । "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु"

[अष्टाध्यायी ६.३.३४] इति सूत्रेण आकारसदृशी इत्यत्र पुंवद्भावः जातः । किञ्च "गोस्त्रियोरुपसर्जनस्य" [अष्टाध्यायी १.२.४८] इति सूत्रेण प्रज्ञाशब्दस्य आकारः ह्रस्वः जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपः इत्यस्य विशेषणमिदम् ।

19. **सदृशागमः (१.१५)**— सदृशः आगमः यस्य इति विग्रहे बहुव्रीहिसमासे सदृशागमः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपः इत्यस्य विशेषणमिदम् । प्रज्ञया सदृशः आगमः कार्यारम्भः दिलीपस्य इति तात्पर्यम् । अत्र प्रज्ञया इति पदेन सह सदृशस्य अन्वयः । एवञ्चेत् सदृशागमः इति पदस्य एकदेशे अन्वयः । अतः अत्र असमर्थसमासः विद्यते ।
20. **सदृशारम्भः (१.१५)**— सदृशः आरम्भः यस्य इति विग्रहे बहुव्रीहिसमासे सदृशारम्भः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् । आगमैः सदृशः कार्यारम्भः दिलीपस्य इति तात्पर्यम् । अत्रापि पूर्ववत् असमर्थसमासः विद्यते ।
21. **आरम्भसदृशोदयः (१.१५)**— आरम्भसदृशः उदयः यस्य इति विग्रहे बहुव्रीहिसमासे आरम्भसदृशोदयः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् । आरम्भैः सदृशः फलोदयः दिलीपस्य इति तात्पर्यम् । अत्र तु समर्थसमासः एव विद्यते ।
22. **नेमिवृत्तयः (१.१७)**— नेमीनां वृत्तिः इव वृत्तिः यासाम् इति विग्रहे बहुव्रीहिसमासे नेमिवृत्तयः इति रूपं निष्पद्यते । "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकेन अत्र बहुव्रीहिसमासः, वृत्तिः इति उत्तरपदस्य लोपश्च जातः । प्रजाः इति पदस्य विशेषणत्वेन प्रयुक्तः अयं शब्दः । तस्मात् अत्र स्त्रीलिङ्गत्वम् । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
23. **सहस्रगुणम् (१.१८)**— सहस्रं गुणाः यस्मिन् तत् इति विग्रहे बहुव्रीहिसमासे सहस्रगुणम् इति रूपं निष्पद्यते । पदमिदं कर्म इति पदस्य विशेषणम् । अतः अत्र नपुंसकलिङ्गे वर्तते इदं पदम् । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते । "सहस्रगुणमुत्स्रष्टुम्" इति मूलग्रन्थः । तत्र कर्म इति पदं न वर्तते । तथापि उत्सर्जनक्रियायाः विशेषणत्वेन

पदस्यास्य प्रयुक्तत्वात् कर्म इति पदम् अध्याहृत्य तस्य विशेषणत्वेन सहस्रगुणम् इति पदस्य बहुव्रीहिसमासः प्रदर्शितः ।

24. **संवृतमन्त्रस्य (१.२०)**— संवृतः मन्त्रः यस्य इति विग्रहे बहुव्रीहिसमासे संवृतमन्त्रः इति रूपम् । ततः षष्ठैकवचने संवृतमन्त्रस्य इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । तस्य इति पदस्य विशेषणमिदम् । अनेन दिलीपस्य परामर्शः ।
25. **गूढाकारेङ्गितस्य (१.२०)**— गूढे आकारेङ्गिते यस्य इति विग्रहे बहुव्रीहिसमासे गूढाकारेङ्गितः इति रूपम् । ततः षष्ठ्येकवचने गूढाकारेङ्गितस्य इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । तस्य इति पदस्य विशेषणमिदम् । अनेन दिलीपस्य परामर्शः ।
26. **सप्रसवाः (१.२२)**— सह प्रसवः येषाम् इति विग्रहे षष्ठ्यर्थबहुव्रीहिः समासः । "वोपसर्जनस्य" [अष्टाध्यी ६.३.८२] इति सूत्रेण अत्र सहशब्दस्य स्थाने सादेशः जातः । गुणाः इति पदस्य विशेषणमिदम् ।
27. **धर्मरतेः (१.२३)**— धर्मे रतिः यस्य इति विग्रहे बहुव्रीहिसमासे धर्मरतिः इति रूपम् । ततः षष्ठ्येकवचने धर्मरतेः इति रूपं निष्पद्यते । अत्र व्यधिकरणबहुव्रीहिसमासः अस्ति । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । तस्य इति पदस्य विशेषणमिदम् । अनेन दिलीपस्य परामर्शः ।
28. **परार्थैकफला (१.२९)**— परार्थः एव एकं फलं येषाम् इति विग्रहे बहुव्रीहिसमासे परार्थैकफलाः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । बहुपदबहुव्रीहिः अयम् । गुणाः इत्यस्य विशेषणमिदम् ।
29. **वेलावप्रवलयाम् (१.३०)**— वेलाः एव वप्रवलयाः यस्याः इति विग्रहे बहुव्रीहिसमासे वेलावप्रवलया इति रूपम् । ततः द्वितीयैकवचने वेलावप्रवलयाम् इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । उर्वीम् इति पदस्य विशेषणमिदम् ।
30. **परिखीकृतसागराम् (१.३०)**— परिखीकृताः सागराः यस्याः इति विग्रहे बहुव्रीहिसमासे परिखीकृतसागरा इति रूपम् । ततः द्वितीयैकवचने परिखीकृतसागराम् इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । उर्वीम् इति पदस्य विशेषणमिदम् ।
31. **अनन्यशासनाम् (१.३०)**— अविद्यमानम् अन्यशासनं यस्याः इति

विग्रहे बहुव्रीहिसमासे अनन्यशासना इति रूपम् । ततः द्वितीयैकवचने अनन्यशासनाम् इति रूपं निष्पद्यते । "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" इति वार्तिकेन अत्र समासः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।

32. **आत्मजन्मसमुत्सुकः (१.३३)**— अस्मिन् पदे आत्मजन्मा इत्यंशे बहुव्रीहिसमासः विद्यते । तथाहि आत्मनः जन्म यस्य इति विग्रहे बहुव्रीहिसमासे आत्मजन्मा इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थः व्यधिकरणबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् ।
33. **विलम्बितफलैः (१.३३)**— विलम्बितं फलं येषाम् इति विग्रहे बहुव्रीहिसमासे विलम्बितफलाः इति रूपम् । ततः तृतीयैकवचने वलम्बितफलैः इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । मनोरथैः इत्यस्य विशेषणमिदम् ।
34. **सन्तानार्थाय (१.३४)**— सन्तानः अर्थः यस्य इति विग्रहे बहुव्रीहिसमासे सन्तानार्थः इति रूपम् । ततः चतुर्थ्यैकवचने सन्तानार्थाय इति रूपं निष्पद्यते । अर्थशब्दस्य अत्र प्रयोजनम् इत्यर्थः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । विधये इत्यस्य विशेषणमिदम् ।
35. **स्निग्धगम्भीरनिर्घोषम् (१.३६)**— स्निग्धगम्भीरः निर्घोषः यस्य इति विग्रहे बहुव्रीहिसमासे स्निग्धगम्भीरनिर्घोषः इति रूपम् । ततः द्वितीयैकवचने स्निग्धगम्भीरनिर्घोषम् इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । स्यन्दनम् इत्यस्य विशेषणमिदम् ।
36. **परिमेयपुरःसरौ (१.३७)**— परिमेयाः पुरःसराः ययोः इति विग्रहे बहुव्रीहिसमासे परिमेयपुरःसरौ इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । सुदक्षिणादिलीपौ इत्यस्य विशेषणमिदम् ।
37. **सुखस्पर्शैः (१.३८)**— सुखः स्पर्शः येषाम् इति विग्रहे बहुव्रीहिसमासे सुखस्पर्शाः इति रूपम् । ततः तृतीयाबहुवचने सुखस्पर्शैः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । वातैः इत्यस्य विशेषणमिदम् ।
38. **आधूतवनराजिभिः (१.३८)**— आधूताः वनराजयः यैः इति विग्रहे बहुव्रीहिसमासे आधूतवनराजयः इति रूपम् । ततः तृतीयाबहुवचने

आधूतवनराजिभिः इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । वातैः इत्यस्य विशेषणमिदम् ।

39. **रथनेमिस्वनोन्मुखैः (१.३९)**— अस्मिन् पदे उन्मुखाः इत्यंशे बहुव्रीहिसमासः विद्यते । उद्गतानि मुखानि येषाम् इति विग्रहे बहुव्रीहिसमासे उन्मुखाः इति रूपम् । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । शिखण्डिभिः इत्यस्य विशेषणमिदम् ।
40. **अदूरौज्झितवर्त्मसु (१.४०)**— अदूरोज्झितं वर्त्म यैः तानि इति विग्रहे बहुव्रीहिसमासे अदूरोज्झितवर्त्मानि इति रूपम् । ततः सप्तमीबहुवचने अदूरोज्झितवर्त्मसु इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते । मृगद्वन्द्वेषु इत्यस्य विशेषणमिदम् ।
41. **स्यन्दनाबद्धदृष्टिषु (१.४०)**— स्यन्दने आबद्धदृष्टिः यैः इति विग्रहे बहुव्रीहिसमासे स्यन्दनाबद्धदृष्टयः इति रूपम् । ततः सप्तमीबहुवचने स्यन्दनाबद्धदृष्टिषु इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थः व्यधिकरणः बहुव्रीहिः विद्यते । अथवा स्यन्दने आबद्धा स्यन्दनाबद्धा इति सप्तमीतत्पुरुषः । स्यन्दनाबद्धा दृष्टिः येषां ते स्यन्दनाबद्धदृष्टयः इति षष्ठ्यर्थबहुव्रीहिः । मृगद्वन्द्वेषु इत्यस्य विशेषणमिदम् ।
42. **कलनिर्ह्रादैः (१.४१)**— कलः निर्ह्रादः येषाम् इति विग्रहे बहुव्रीहिसमासे कलनिर्ह्रादाः इति रूपम् । ततः तृतीयाबहुवचने कलनिर्ह्रादैः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
43. **उन्नमिताननौ (१.४१)**— उन्नमिते आनने याभ्याम् इति विग्रहे बहुव्रीहिसमासे उन्नमिताननौ इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते ।
44. **अस्पृष्टालकवेष्टनौ (१.४२)**— अस्पृष्टे अलकवेष्टने ययोः इति विग्रहे बहुव्रीहिसमासे अस्पृष्टालकवेष्टनौ इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
45. **यूपचिह्नेषु (१.४४)**— यूपाः एव चिह्नानि येषाम् इति विग्रहे बहुव्रीहिसमासे यूपचिह्नाः इति रूपम् । ततः सप्तमीबहुवचने यूपचिह्नेषु इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । ग्रामेषु इत्यस्य विशेषणमिदम् ।
46. **शुद्धवेषयोः (१.४६)**— शुद्धः वेषः ययोः इति विग्रहे बहुव्रीहिसमासे

शुद्धवेषयोः इति रूपम् । ततः षष्ठीद्विवचने शुद्धवेषयोः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । सुदक्षिणादिलीपयोः विशेषणमिदम् ।

47. **प्रियदर्शनः (१.४७)**— प्रियं दर्शनं यस्य इति विग्रहे बहुव्रीहिसमासे प्रियदर्शनः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् ।
48. **बुधोपमः (१.४७)**— बुधः उपमा यस्य इति विग्रहे बहुव्रीहिसमासे बुधोपमः इति रूपं निष्पद्यते । "गोस्त्रियोरुपसर्जनस्य" [अष्टाध्यायी १.२.४८] इति सूत्रेण उपमाशब्दस्य आकारः ह्रस्वः जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् ।
49. **दुष्प्रापयशाः (१.४८)**— दुष्प्रापं यशः यस्य इति विग्रहे बहुव्रीहिसमासे दुष्प्रापयशाः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् ।
50. **श्रान्तवाहनः (१.४८)**— श्रान्तानि वाहनानि यस्य इति विग्रहे बहुव्रीहिसमासे श्रान्तवाहनः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते । दिलीपस्य विशेषणमिदम् ।
51. **तत्क्षणोज्झितवृक्षकम् (१.५१)**— तत्क्षणोज्झिताः वृक्षकाः यस्मिन् सः इति विग्रहे बहुव्रीहिसमासे तत्क्षणोज्झितवृक्षकः इति रूपम् । ततः द्वितीयैकवचने तत्क्षणोज्झितवृक्षकम् इति रूपं निष्पद्यते । आश्रमम् इति द्वितीयान्तपदस्य विशेषणमिदम् । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते । आश्रमम् इत्यस्य विशेषणमिदम् ।
52. **आतपात्ययसंक्षिप्तनीवारासु (१.५२)**— आतपात्ययसंक्षिप्ताः नीवाराः यासु ताः इति विग्रहे बहुव्रीहिसमासे आतपात्ययसंक्षिप्तनीवाराः इति रूपम् । ततः सप्तमीबहुवचने आतपात्ययसंक्षिप्तनीवारासु इति रूपं निष्पद्यते । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते ।
53. **वर्तितरोमन्थम् (१.५२)**— वर्तितः रोमन्थः यस्मिन् इति विग्रहे बहुव्रीहिसमासे वर्तितरोमन्थः इति रूपम् । ततः द्वितीयैकवचने वर्तितरोमन्धम् इति रूपं निष्पद्यते । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते ।
54. **आश्रमोन्मुखान् (१.५३)**— अस्मिन् पदे उन्मुखाः इत्यंशे बहुव्रीहिसमासः विद्यते । उद्गतं मुखं येषाम् इति विग्रहे बहुव्रीहिसमासे

उन्मुखाः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।

55. **गुप्ततमेन्द्रियाः (१.५५)**— गुप्ततमानि इन्द्रियाणि येषां इति विग्रहे बहुव्रीहिसमासे गुप्ततमेन्द्रियाः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
56. **आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् (१.५८)**— आतिथ्यक्रिया-शान्तः रथक्षोभपरिश्रमः यस्य इति विग्रहे बहुव्रीहिसमासे आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमः इति रूपम् । ततः द्वितीयैकवचने आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
57. **विजितारिपुरः (१.५९)**— विजितानि अरिपुराणि येन इति विग्रहे बहुव्रीहिसमासे विजितारिपुरः इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते ।
58. **प्रशमितारिभिः (१.६१)**— प्रशमिताः अरयः यैः इति विग्रहे बहुव्रीहिसमासे प्रशमितारयः इति रूपम् । ततः तृतीयाबहुवचने प्रशमितारिभिः इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते ।
59. **निरातङ्काः (१.६३)**— निर्गतः आतङ्कः याभ्यः ताः इति विग्रहे निर्गत सु आतङ्क सु इत्यलौकिकविग्रहे च बहुव्रीहिसमासे निरातङ्काः इति रूपं निष्पद्यते । "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः" इति वार्तिकेन अत्र समासः । अनेनैव वार्तिकेन गत इति उत्तरपदस्य लोपः जायते । प्रजाः इति पदस्य विशेषणत्वात् स्त्रीलिङ्गे पदमिदम् । अत्र प्रादिबहुव्रीहिः विद्यते ।
60. **ब्रह्मयोनिना (१.६४)**— ब्रह्मा योनिः यस्य इति विग्रहे बहुव्रीहिसमासे ब्रह्मयोनिः इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते ।
61. **सानुबन्धाः (१.६४)**— अनुबन्धैः सह वर्तन्ते इति विग्रहे बहुव्रीहिसमासे सानुबन्धाः इति रूपं निष्पद्यते । अत्र सहपूर्वपदबहुव्रीहिः विद्यते ।
62. **अदृष्टसदृशप्रजम् (१.६५)**— अदृष्टा सदृशप्रजा येन इति विग्रहे बहुव्रीहिसमासे अदृष्टसदृशप्रजः इति रूपम् । ततः द्वितीयैकवचने अदृष्टसदृशप्रजम् इति रूपं निष्पद्यते । अत्र "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु"

[अष्टाध्यायी ६.३.३४] इति सूत्रेण अदृष्टा इति पदस्य पुंवद्भावः जातः । प्रजाशब्दस्य च "गोस्त्रियोरुपसर्जनस्य" [अष्टाध्यायी १.२.४८] इति सूत्रेण आकारः ह्रस्वः जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।

63. **सद्वीपा (१.६५)**— द्वीपैः सह वर्तमाना इति लौकिकवग्रहे द्वीप भिस् सह इत्यलौकिकविग्रहे "तेन सहेति तुल्ययोगे" [अष्टाध्यायी २.२.२८] इति सूत्रेण बहुव्रीहिसमासे सहशब्दस्य पूर्वनिपाते "वोपसर्जनस्य" [अष्टाध्यायी ६.३.८२] इति सूत्रेण सहशब्दस्य स्थाने स इत्यादेशे सद्वीप इति जायते । ततः स्त्रीत्वे टाप्प्रत्यये सद्वीपा इति रूपं निष्पद्यते ।
64. **तपोदानसमुद्भवम् (१.६९)**— तपोदाने समुद्भवः यस्य तत् इति विग्रहः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
65. **असह्यपीडम् (१.७१)**— असह्या पीडा यस्मिन् तत् इति विग्रहे बहुव्रीहिसमासे असह्यपीडम् इति रूपं निष्पद्यते । "गोस्त्रियोरुपसर्जनस्य" [अष्टाध्यायी १.२.४८] इति सूत्रेण अत्र पीडाशब्दस्य आकारस्य ह्रस्वः । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते ।
66. **अनिर्वाणस्य (१.७१)**— अविद्यमानं निर्वाणं यस्य इति विग्रहे अनेकमन्यपदार्थे इति सूत्रेण बहुव्रीहिसमासे अनिर्वाणः इति रूपम् । ततः षष्ठ्येकवचने अनिर्वाणस्य इति रूपम् । अत्र नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः इति वार्तिकेन विद्यमान इति उत्तरपदस्य लोपः जातः । अत्र नञ्बहुव्रीहिः विद्यते ।
67. **ध्यानस्तिमितलोचनः (१.७३)**— ध्यानस्तिमिते लोचने यस्य इति विग्रहे बहुव्रीहिसमासे ध्यानस्तिमितलोचनः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
68. **सुप्तमीनः (१.७३)**— सुप्ताः मीनाः यस्मिन् इति विग्रहे बहुव्रीहिसमासे सुप्तमीनः इति रूपं निष्पद्यते । अत्र सप्तम्यर्थबहुव्रीहिः विद्यते । ह्रदः इत्यस्य विशेषणमिदम् ।
69. **भावितात्मा (१.७४)**— भावितः आत्मा यस्य इति विग्रहे बहुव्रीहिसमासे भावितात्मा इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
70. **उद्दामदिग्गजे (१.७८)**— उद्दामानः दिग्गजाः यस्मिन् तत् इति विग्रहे

बहुव्रीहिसमासे उद्दामदिग्गजम् इति रूपम्। ततः सप्तम्येकवचने उद्दामदिग्गजे इति रूपं निष्पद्यते। अत्र सप्तम्यर्थबहुव्रीहिः विद्यते। स्रोतसि इति पदस्य विशेषणमिदम्।

71. **सार्गलम् (१.७९)**— अर्गलेन सह वर्तमानम् इति विग्रहे तेन सहेति तुल्ययोगे इति सूत्रेण बहुव्रीहिसमासे सहशब्दस्य स्थाने वोपसर्जनस्य इति सूत्रेण सादेशे सार्गलम् इति रूपं निष्पद्यते।
72. **दीर्घसत्रस्य (१.८०)**— दीर्घं सत्रं यस्य सः इति विग्रहे बहुव्रीहिसमासे दीर्घसत्रः इति रूपम्। ततः षष्ठ्येकवचने दीर्घसत्रस्य इति रूपं निष्पद्यते। अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते।
73. **भुजङ्गपिहतद्वारम् (१.८०)**— भुजङ्गपिहितं द्वारं यस्मिन् तत् इति विग्रहे बहुव्रीहिसमासे भुजङ्गपिहितद्वारम् इति रूपम्। ततः द्वितीयैकवचने भुजङ्गपहितद्वारम् इति रूपं निष्पद्यते। पातलम् इति पदस्य विशेषणमिदम्। अत्र सप्तम्यर्थबहुव्रीहिः विद्यते। पातालम् इति पदस्य विशेषणमिदम्।
74. **सपत्नीकः (१.८१)**— पत्न्या सह वर्तमानः इति विग्रहे तेन सहेति तुल्ययोगे इति सूत्रेण बहुव्रीहिसमासे वोपसर्जनस्य इति सूत्रेण सहशब्दस्य सादेशे सपत्नीकः इति रूपं निष्पद्यते। "नद्यृतश्च" [अष्टाध्यायी ५.४.१५३] इति सूत्रेण अत्र समासान्तः कप्प्रत्ययः जायते। ततः "केऽणः" [अष्टाध्यायी ७.४.१३] इति सूत्रेण ककारे परे पूर्वस्य अणः ह्रस्वत्वं प्राप्नोति। परन्तु "न कपि" [अष्टाध्यायी ७.४.१४] इति सूत्रेण ह्रस्वत्वनिषेधे सपत्नीकः इति रूपं निष्पद्यते। अत्र सहपूर्वपदबहुव्रीहिः विद्यते। दिलीपः इत्यस्य विशेषणमिदम्।
75. **ललाटोदयम् (१.८३)**— ललाटः उदयः यस्य इति विग्रहे बहुव्रीहिसमासे ललाटोदयः इति रूपम्। ततः द्वितीयैकवचने ललाटोदयम् इति रूपं निष्पद्यते। अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते।
76. **कुण्डोध्नी (१.८४)**— कुण्डम् इव ऊधः यस्याः इति लौकिकविग्रहे कुण्ड सु ऊधस् सु इत्यलौकिकविग्रहे अनेकमन्यपदार्थे इति सूत्रेण बहुव्रीहिसमासे कुण्डोधस् इति जायते। ततः "ऊधसोऽनङ्" [अष्टाध्यायी ५.४.१३१] इति सूत्रेण सकारस्य स्थाने अनङादेशे कुण्डोधन् इति जायते। ततः स्त्रीत्वे वाच्ये "ऋन्नेभ्यो ङीप्"

[अष्टाध्यायी ४.१.५] इति सूत्रेण ङीप्रत्यये प्राप्ते "अनो बहुव्रीहेः" [अष्टाध्यायी ४.१.१२] इति सूत्रेण ङीप्रत्ययस्य निषेधे "बहुव्रीहेरूधसो ङीष्" [अष्टाध्यायी ४.१.२५] इति सूत्रेण ङीष्प्रत्यये प्रक्रियाकार्ये कुण्डोध्नी इति रूपं निष्पद्यते ।

77. **पुण्यदर्शनाम् (१.८६)**— पुण्यं दर्शनं यस्याः इति विग्रहे बहुव्रीहिसमासे पुण्यदर्शना इति रूपम् । ततः द्वितीयैकवचने पुण्यदर्शनाम् इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
78. **आशंसितावन्ध्यप्रार्थनम् (१.८६)**— अस्मिन् पदे बहुव्रीहिसमासः द्विः अस्ति । तथाहि अवन्ध्यं प्रार्थनं यस्य तत् इति विग्रहे बहुव्रीहिसमासे अवन्ध्यप्रार्थनम् इति रूपं निष्पद्यते । ततः अशंसितम् अवन्ध्यप्रार्थनं यस्य सः इति विग्रेह बहुव्रीहिसमासे आशंसितावन्ध्यप्रार्थनः इत रूपं निष्पद्यते । ततः द्वितीयैकवचने आशंसितावन्ध्यप्रार्थनम् इति रूपं निष्पद्यते ।
79. **वन्यवृत्तिः (१.८८)**— वन्यवृत्तिः इव वृत्तिः यस्य इति विग्रहे सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च इति वार्तिकेन बहुव्रीहिसमासे वन्यवृत्ति इति पदस्य वृत्ति इति उत्तरपदस्य लोपे वन्यवृत्तिः इति रूपं निष्पद्यते ।
80. **पीताम्भसि (१.८९)**— पीतम् अम्भः यया इति विग्रहे बहुव्रीहिसमासे पीताम्भाः इति रूपम् । ततः सप्तम्येकवचने पीताम्भसि इति रूपं निष्पद्यते । अत्र तृतीयार्थबहुव्रीहिः विद्यते ।
81. **सपरिग्रहः (१.९२)**— परिग्रहेण सह वर्तते इति विग्रहे तेन सहेति तुल्ययोगे इति सूत्रेण बहुव्रीहिसमासे सपरिग्रहः इति रूपं निष्पद्यते । अत्र सहपूर्वपदबहुव्रीहिः विद्यते ।
82. **सूनृतवाक् (१.९३)**— सूनृता वाक् यस्य इति विग्रहे बहुव्रीहिसमासे सूनृतवाक् इति रूपं निष्पद्यते । अत्र "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु" [अष्टाध्यायी ६.३.३४] इति सूत्रेण सूनृता इत्यत्र पुंवद्भावः जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।
83. **उर्जितश्रियम् (१.९३)**— ऊर्जिता श्रीः यस्य सः इति विग्रहे बहुव्रीहिसमासे ऊर्जितश्रीः इति रूपं निष्पद्यते । अत्र "स्त्रियाः

पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु" [अष्टाध्यायी ६.३.३४] इति सूत्रेण ऊर्जिता इत्यत्र पुंवद्भावः जातः । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।

84. **प्रयतपरिग्रहः (१.९५)—** प्रयतः परिग्रहः यस्य इति विग्रहे बहुव्रीहिसमासे प्रयतपरिग्रहः इति रूपं निष्पद्यते । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।

85. **तच्छिष्याध्ययननिवेदितावसानाम् (१.९५)—** तच्छिष्याध्ययन-निवेदितम् अवसानं यस्याः इति विग्रहे बहुव्रीहिसमासे तच्छिष्याध्ययननिवेदितावसाना इति रूपम् । ततः द्वितीयैकवचने तच्छिष्याध्ययननिवेदितावसानाम् इति रूपं निष्पद्यते । स्त्रीत्वे विवक्षिते टाप्प्रत्ययः । रात्रिम् इति द्वितीयान्तस्य विशेषणमिदम् । अत्र षष्ठ्यर्थबहुव्रीहिः विद्यते ।

उपसंहारः

एवं रघुवंशमहाकाव्ये प्रथमसर्गस्थानां बहुव्रीहिसमासनिष्पन्नपदानाम् एकम् अध्ययनं विहितम् । प्रायः पञ्चाशीति बहुव्रीहिसमासनिष्पन्नपदानि सन्ति प्रथमसर्गे । सम्पूर्णरघुवंशमहाकाव्यं पश्यामश्चेत् तत्पुरुषस्यैव आधिक्यं दृश्यते । ततः परमेव संख्यादृष्ट्या बहुव्रीहिसमासस्य स्थानम् । अस्मिन् प्रबन्धे बहुव्रीहिसमासत्वेन यानि पदानि स्वीकृतानि, तेषां समेषां पाणिनीयसूत्रैः वार्तिकैर्वा साधुत्वं प्रतिपादितम् । सर्वेऽपि प्रयोगाः पाणिनीयाः एव सन्ति इति वक्तुं शक्यते । किञ्च रघुवंशे प्रथमसर्गे येषां समस्तपदानाम् अन्यपदार्थप्रधानत्वं विद्यते तानि एव अत्र स्वीकृतानि । द्वित्रस्थलेषु असमर्थसमासः परिलक्षितः । तत् प्रबन्धे आलोचितम् । अनेन पर्यालोचनेन बहुव्रीहिसमासस्य प्रयोगविषये एकं सुष्ठु अवधारणं भवेत् पाठकानाम् इति आशास्महे ।

✶ ✶ ✶

Bibliography

1. *रघुवंशमहाकाव्यम्* (सञ्जीविनी-संस्कृत-हरिप्रिया-हिन्दीव्याख्योपेतम्) ; कालिदासः ; मल्लिनाथः, पण्डितलक्ष्मीप्रपन्नाचार्यः (व्याख्याकारौ) ; पण्डित-रामचन्द्र-झा व्याकरणाचार्यः (सम्पादकः) ; चौखम्बा कृष्णदास अकादमी, वाराणसी ; २००७ ।

2. *रघुवंशमहाकाव्यम्* (सञ्जीविनीटीका-धारादत्तमिश्रकृतसंस्कृतव्याख्या-हिन्द्यनुवादसहितम्) ; कालिदासः ; मल्लिनाथः, आचार्य धारादत्तमिश्रः (व्याख्याकारौ) ; मोतीलाल बनारसीदास ; २०१७ ।
3. *रघुवंशमहाकाव्यम्* (सञ्जीवनीटीकायुत-मणिप्रभाहिन्दीव्याख्योपेतम्) ; कालिदासः ; मल्लिनाथः, श्रीहरगोविन्दमिश्रः (व्याख्याकारौ) ; चौखम्भा संस्कृत संस्थान ; वि. स. २०५९ ।
4. *वैयाकरणसिद्धान्तकौमुदी* (द्वितीयो भागः) बालमनोरमातत्त्वबोधिनीसहिता ; भट्टोजिदीक्षितः ; वासुदेवदीक्षितः, ज्ञानेन्द्रसरस्वती (व्याख्याकारौ) ; गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ) ; मोतीलाल बनारसीदासः ; २०१४ ।
5. *वैयाकरणसिद्धान्तकौमुदी* (श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता, द्वियीयो भागः) ; भट्टोजिदीक्षितः ; श्रीगोविन्दाचार्यः (व्याख्याकारः) ; लक्ष्मीशर्मा (सम्पादिका) ; चौखम्बा सुरभारती प्रकाशन, वाराणसी ; २०१६ ।

* * *